भक्त्यन्तः पदगीतः सर्वत्र सन्ध्यगीतं वच्यामः क्रौञ्चाष्टमिके स्त्रो विभाषयत उषसोभिम्रि स्वानसे ह्वैगते पुनानाया सुत्सोजिगनवस्ते पूतायां क्रौञ्चाष्टमिके मानजर्जं इत्येतौशब्दौ नोधसे नेन्द्रः कद्वेदाया माष्कारणिधने काखे महोदिव इत्येतौ शब्दौ प्रत्नं पीयूषायां फैधे प्रस्मवाजेषु नश्वाध्वर्यवः सुवर्विद इत्येतौ शब्दावाष्टविरित्यत्तौशन इन्द्रः शूरश्च महानाम्नीषु यद्या७रथो वोधीये वारेथादुव एह्य्-हतीयायां तुमद्विवश्च वर्हिश्च तन्तेमदायाए सिषासन्तः स्नुधीहवायां देव७राधः सदुद्रवायाउ रजः सूर्यौ विते महस्तवानो बृहद्रथन्तरे पवित्रवन्त इति देवासश्च वान्ते त्वाष्ट्रीसाम्नि ॥ २

भक्तिमध्यः पादमध्यश्च स्तोभे प्रत्यये पदगीतः सर्वत्र सम्ध्यग्रगोतं वक्ष्यामोऽस्येदिन्द्रः द्वारे वसुरुच उत्सेधे तुवस्वारयोस्त्वाष्ट्रीसाम्नोः रजः सूर्य्यस्य पूर्वे देवो धैतो मत्सरासोऽश्वस्य जम्भे वृषामदः स्वरे बृहन्निधने वयः स्वासु वत्साश्वभिद्य च्यावने पासाश्यं पवस्वमधुमायां चेन्द्रः श्येनः सन्तनिनि सोमो वाम्रे चन्द्रो वाम्रे राधः कौत्से मयो भरे स्तोत्रश्यो वारे देवः पुनाभिसोमयो-मैधष्टस्मयोः स्तावे मत्सरासस्य ॥ ३

भक्तिमध्यः पादमध्यश्च स्तोभे प्रत्यये सम्ध्यग्रगोतः सर्वत्र पदगीतं वक्ष्यामो देवः प्रत्युत्क्रान्त ऐडयास्य-द्वितीयायां जिगत्नवस्ते पूतायां वाङ्निधने क्रौञ्चे जारः प्रसुन्वान-द्वितीयायां विते होषोस्वर उत्सस्निणिध-नायास्ये घृतवृतस्त्रैशोके भरन्तः सौभरलैययोः पुरो-जिनर द्वतिग्रतो शब्दो मराये श्रुव य द्रुमाउत्वायाए श्यैते श्रवः कार्त्तयशोदलस्वेषु श्येनः सम्मिस्नायाए सएहिते जातो वाचःसाम्नि प्रियन्देवायान्दधन्वाए ङ्गः सर्वत्र दत्तशूरावर्कं शार्गे च वृत्रयुजो भारद्वाजे पुरां दर्म आमन्द्रैरित्यत्राभिनिधने काण्वे मर्त्तो योयए सहोतायां कमश्वे श्वाययन्तोभित्वाशूरायां कण्वतरे-स्येदिन्द्रस्याभित्वापूर्वायाए सुष्टुतयो वषट्रायां बृहति

रुषङ्वयस्त इत्यच वाजीये द्विर्यो रथन्तरबृहति राध-
स्तन्नो वीङ्के विधतोभद्राइन्द्रायाए सौभरे भरमाणो-
भ्यभिहि यौधे सृजानः स वाज्यन्नायां बोधीये
बोधीये ॥ ४

आकारो त्वम्पाशब्दः प्रकाव्यायां पार्थवाराहकुत्स-
रथीयेष्विन्द्रायेन्दविति क्रौञ्चे पूर्वयोः स्तोत्रीययोर्वा
हाइस्तोभे प्रत्यये जस्वा वैश्वमनसे वृधा बृहद्वारे पूर्वथा
कारवतरे द्विता सुज्ञाने दिवश्रा प्रत्नम्पीयूष मित्यत्
जयामहीवोरसेधेषूच्चैनैटत एकारे प्रत्यय आर्यः कालेय
आसाइन्तीयोत्तमे जेथा नार्मेधे हव्या विशीय इन्द्रावो
कावार्षाहरे गौथेभ्यासे प्रत्यये दुहा सखा मत्स्वे प्रत्यये
वैराज आःकारो त्वंमदाः सुतासोमायां बृहद्रथन्तरयोः
स्तावे तमाः श्यावैश्वाश्वावायां प्रत्यये नित्यवत्साती-
षङ्गसिमास्विकारो त्वमिवोत्सेधे दुहानायां प्रतीनि
द्विहिङ्कादेव्ये र्षसि कारवतरे ड्विन उत्तरयोरास्तोभे
प्रत्यय ओकारो त्वन्नदंव ओसएस्तोभ ओस्तोभे च महा-
मिन्दवेकारौकारयोरत्वमोर्ध्वे महे त्रीयेऽकारो त्वन्नो
अर्षसि पुनानायाए साप्तमिकत्रिणिधनायास्ययोर्यौ-
धाजये च वृषो अचिक्रायां च त्रिणिधनेयम्पूषायाञ्च
क्रौञ्चे वश्व बृहति स्तावे परउत्सेधे दुहानायाम्पुरो

मत्स्वे प्रत्यये वैराजे पुरुषः शब्दः प्रथमस्वरो व्याहृतिषु कामे च सर्वासु मदभियरुहशब्दा मध्यमे विकल्पे ॥५

वृद्ध ऋवर्णं सर्वं मार्भवति षकारस्पर्शयोः प्रत्यययोर्घृताः का२३र्षािका२३ह्वीं३ एवं जातीयानि टकारस्तु न सर्वेषु स्पर्शेष्वार्भवति यथा योजा३४रिट३भ्योमघवाश्रोयितृ२३४पा३ टकारस्तषयोः प्रत्यययोरार्भवति ता३र्त्ता ३यामधिरोता३ र्षाणा२३४श्रो रकारो हकारो पृकारः स्निकारे शुगा२३र्हा२या३रुचदुषसः पार्श्निरग्रा३या२३ यामे चायङ्गैरिति न क्त श्वोने प्रत्यय उक्तास्त्वभ्यासादौ व्यञ्जनलोपः श्वोनका३श्वोनका२३ यदुक्तं पुरस्तात्षकारस्पर्शयोः प्रत्यययोरार्भवतीति तत्रापवादाः सस्रग्मवाद्वध्वा च नामैधे चक्रमा शाक्त्र एतदेवोदाहरणं यूथादानायां कौल्मकराववृहतोः संटभातून इत्यत्राकूपारे मर्षं स्वासु दैर्घ एतदेवोदाहरण मभिक्रन्दायां श्रेनुवरुणयोर्गिरस्त इन्दायाञ्च सहिते नभ्र प्रसुन्वानायां गौतमसाध्रश्यावाश्वौदलाकूपारदासवैश्वामित्रस्वारकौत्सरावतरदोहतरेषु नृभिः प्रतसधस्थमित्यतै डयास्यगौङ्गवीयषेधाभीशाष्कार--सोमवरुणतमतरजम्भेष्वेतदेवोदाहरण मभिसो-

माध्यास्यायाऌहदुकथाग्नेस्त्रिणिधनहन्मनेषु धत्तीयां त्रीयकावाभिक्रन्देष्ववद्युतानायां च तमसोकें कक्त तन्तमदायाऌ हारिभरवारेष्वे तद्देवोदाहरण मय-स्युनानायां त्रीये तन्त्रामदायास्त्र सऌहिते ग्रोष् वत्रासु च ॥ ६

सस्ट त्वैशोके वृत्तवयङ्गल्वाया मभिनिधने काखवे वृषिार्यस्यानोर्वेऌशीयद्वेवापद्दगुपलाजावार-ल्ततोयाया मेतदेवोदाहरण मयऌसूर्याया मामहीयव-बोधीयच्चषभपावमानाश्रुमार्गीसौम्यैटतसाकेष्वृषिक्त-च्छिशु देव्येद्व्ज्योतिषेषु तिसृभिः पाहि रैरवेस्यपु-सक्त्च्छगध्यूहारमानवयोस्क्कृदुविल्गुनायां बोधीये पृ-थिवौ प्रदैभान्ते बृहति च यज्ञायथाया स्वधत्तोम-र्दावन्नाये वृद्ध मथार्भवति षभे थिवौं धृष्णुवृषिा-वृषन्वारे मत्पर्धेनैा कृखवती कौञ्चे मज्यकाखतरे कृन्त-च्छङ्कुनि मार्ज्यमानः सुहस्तियाइ निर्गा श्वकाए२ तंदो२ ट्स्पाया मृवर्णौ प्राप्तऌ रेफः प्रथमस्वरायां लुद्वाया मपद्दिश्यते वा२३पा३रथन्तरे च सवदेव्यह-दाग्नेययोर्ऋवर्णै प्राप्त मकारः क्रियते ना२३ र्वना ॥ ७

ऋचि प्रश्लिष्टाः स्वरसन्धयः पादमध्ये साम्नि वि-

वृता ये तान् वक्ष्यामो मह्व वस इमाउवायां वारदेव्य रथवृहत्सु श्रुथे तु प्रश्लेषोभोन्द्र मभिनायु भिद्यत पार्थे कितवः स्वासु मरुताङ्गभौ महत्तत्सोमायाए स-र्वत्र छन्दसि तु प्रश्लेषः प्रसुन्वानाय सर्वत्र पवस्वयस्ते-मद्रायाए सर्वत्र सोमसामसाहीयशाम्मदेषु प्रश्लेषः पुरो नः सर्वच माशिवासः सर्वत्र श्वाद्रिर्नार्वा च पिबासो-माया मृषभे प्रस्मवाजेषु नः सर्वत्र रवोद्गीथे तु प्रश्लेषो ना अविभिः सुषावसोमायाए सर्वत्राष्टादए-ष्ट्रार्कपुष्पसंकृतियशःसु प्रश्लेषः ॥ ८

सुतेचिद्मानवे वृह्णाच्च सर्वत्रायास्ये -तु प्रश्लेष उदिन्द्र लएद्योहोल्यत्र कण्वद्वहति पूर्वकल्पे स्तावे च जम्भे प्रतिहारे कौल्मे स्तावे गायन्ता यूथादानायां कण्वद्वहति जम्भे च तवाद्यायाए सहोदैर्घमरायर्योर्वे-राजे च स्तावे ' तवद्वितीयाया माभीशवदैगतयो रहस्ये च ब्रहत्यरुषी प्रतिष्या सूनरी द्वितीयायास्त्वा-धीये देवाजर मातेअग्नइध्रीमहीत्यच लन्नइन्द्रौपगवे चासाद्वन्तीयोत्तमतृतीयाया मापाथिभेयदिन्द्रायाए श्येने स्वार्चतोवैराजर्षभे देवाञ्जसा ब्रहति मही नधा रागो राजा च कावे पादान्त्यात्परः स्वरो विकृ-ष्यते यथानूषतावद्युतानायाए शाचिपूजन यतइन्द्र-

द्वितीयायां दृष्टाय विधर्मणि गमिष्ठानसꣳस्कृत मित्यत्रौशन एवञ्जातीयानि ॥ ९

अथापवादाः प्रश्लिष्टा अꣳशोरित्यस्य शब्दस्यावृद्धात्परस्य प्रश्लेषः सर्वत्रेह न यदिन्द्रचित्रायां वसिष्ठप्रियषङ्ग्योर्दिवस्पदे तपोष्पवित्रायां ह्नीये मोषुत्वा पार्श्वं श्रुधिश्रद्दीभ्यासे धियोग्ने भरामे ध्याया मन्ते जिषु सन्तिनि त्वचि सुष्वाणाया माम्बीगवे धसस्तम्बादस्माघाया माथर्वणसौभरयोः प्रत्यस्मै तृतीयायाञ्च रथन्तरे वास्तजारातय इत्येतौ शब्दौ प्रोषुवत्सासु युजाणिरिक्षिषायाꣳ रैरवे वोधयोमहेनायां वाजीये डिते वसो नैककुभे तमोषांयां वर्षोर्चतप्रिये व्रह्मयुजा कत्वे धसोद्रयो वासम्ये नदीधिमः श्रायन्तायाꣳ सौभरे सेन्योसिवार्हद्गिरसन्तनिनोवीहनोग्नेविवस्वद्द्वितीयायाꣳ श्रुध्ये वृषाउदास्यत इत्यत्र वाजीये धरया सेधे धियो सेधे जमवर्त्तं चाग्ने तमद्य कमश्वे ततर्हिथो दैर्घश्रवस्यवो देव्ये श्रवस्यवो देव्ये ॥ १०

यः संयोगो यवान्तः क्वचित् संकृष्टः क्वचिद्विकृष्टस्तत्र संकृष्टग्रहणं न्यर्यसाह्नीयपर्णवर्णमित्रविलस्वेषु नैडे दिव्यं ज्यर्षसि यशः सꣳसर्पपुष्पेष्वापृच्छ्य मवृद्धꣳ सर्वत्र मदेष्वाकूलीये जिह्वं न क्लत्यस्य ह्नीयस्योद्गीथे

विश्वाच्याश्विनोर्व्रतपर्याकूपारपुष्पमरायेषु नाभ्रासेल-
द्रयश्वैतेषु वैघने चामराये त्वमग्नये स्वासु दैर्घध्य-
मायाꣳ सूर्य्यस्याभिप्रियाणीत्यत्र स्वारकावन्नीययोरेष-
एव शब्दः सूर्यवतोश्चिनोराजद्वितीयायां चौशने ति-
सूर्यं पुष्पमरायकीर्त्तेयश्चिन्द्रः सूर्यꣳ स्नुचनैपकीर्त्येश्चिव
सूर्य्यं कीर्त्त्या ववासहाꣳश्वसीत्यत्र सूर्यशब्दः सर्वत्र वित-
नैपयोस्त्वाद्यो विक्रुष्टः सूर्यं महतस्तोमायां वैश्वज्योति-
षवास्प्रयोरामायामासूर्य्यꣳ सर्वत्रास्यप्रत्नाया मयꣳ
सूर्य्यशब्दः सर्वत्रान्नैव तृतीयायां न सूर्यो भ्राजे सूर्य्यस्य न
ते गिर इत्यत्र महि सूर्य्यः कीर्त्तेय सꣳसूर्यस्येहवद्दामे
सूर्या वैरूपान्तरिक्षयोस्त्वꣳ सूर्यꣳ सौमित्रे समु सूर्यꣳ
सन्तनिनि यथर्चं गीते पर्वणिष्वविता दाशे महाया-
न्नीयविशीयवारमहामित्रतरेष्विद्धूक मश्वे त्वामिद्धावि
भरे त्वाय सर्वत्र व्याभिन्नीमैधे कुण्डपाय्यः सद्मने
व्योमनीन्द्रसुतायां वꣳशीये हिन्वन्त्यापसो द्विहिङ्कार-
गौङ्गवद्वैगततरेषु वृवतरे च पूर्वकल्पे ॥ ११

ण्योस्तन्वाधर्त्तायाꣳ हाविष्मतसन्तनिनोर्विभाषा
प्रसुन्वान-द्वितीयायाꣳ रथन्तर इदाह्यो मानवे सुत्रपमा
च्छन्दसे पूर्वो वृषामती-द्वितीयायां न्नीये त्वामभि दꣳ-
ष्ट्रोत्तरे मह्यं द्विहिङ्कारभारमानोत्तरवौरतरेषूतस्य-

वैरूपान्तरिचहूस्वासुहष्णाा वैरूपे हर्यश्वपिबासोमद्वितीयायाꣳ सहोदैर्घे मराये त्वाय्यो: स्यन्तमा मराये विद्वान् मरायवैराजर्षभयोस्त्वामिद्धिरिहितायां मराये सहोदैर्घे त्वभ्यासो नम्नगोरौर्मायवयो: परिमियायां मागौंयवे च त्वꣳह्योत्येतौ शब्दौ सौपर्णं पवित्रमत्ये ह्रीये नकिष्ट्ठ क्षिते साव्यꣳशु: सर्वत्र न सन्तनिन्नि पाष्यो: क्रोशिष्वैरय वैतक्रोशवार्शेषु त्वाꣳरिहत्वंयास्त्व गवाष्टेडसिमासु त्वं दाꣳ शुद्धीये सुहस्त्यरम्भ्रोत्तरवरुणगोष्ठार्कपुष्पेषु स्वान: परिस्वानायां वैदन्वतह्वाविष्मतरेवतोष्वेष एव शब्दोक्रान्वासिष्ठे परीताध्यास्यायां चानवमेहनि त्वं कविर्द्वितीये दन्वते मित्रा: स्वाना: सर्वत्र दध्याशिरो विते व्यद्रिभिर्यन्तीये त्वम्मातौपगवे वरेण्यं प्राध्यज्ञातौषड्ढे त्यो गभस्त्यो: स्व:शब्दश्च ह्रीये स्व: कावाभिक्रान्दयोरत्योर्के त्योगभस्त्यो: ष्वाविशेत्येते शब्दास्त्रय: शार्गे क्रत्व्योनुमायो त्यो गभस्त्यो: स्व:ष्वाविशेत्येते शब्दा: षडष्टेडे ॥ १६

॥ इति षष्ठ: प्रपाठक: ॥

देवेभ्य: संह्वारे नर्य: परीतायां माधुयास्यभीशरौरदꣳष्ट्रजम्भानूपयौधद्वैगरत्वतरस्थानसंक्रातिभर्गयशाथ-

वैखानसेषु नवमे चाह्नि सर्वत्र दैर्घवर्ज्जं विभाषारूणा-सामन्नेष एव शब्दः संक्रुष्टो गामन्नभ्रक्लैव्यध्वसाश्वा-लोमे तमसोर्को चात्रैव तृतीयाया मत्यः सर्वत्र न्यो-जसा कोर्त्तेर्भ्यं कीत्यां काशीतहाविष्कृतयोस्त्व शब्दः सर्वासु त्वां देवासो रीत्या य इत्येतौ शब्दौ वैश्वमनस-श्रुध्ययोरर्चन्तुग्रहणशीयवितयोः सान्वाह्लो वशीये भूर्य-वशीयलेयावतेषु पर्यूष्वान्बीगवसलोभयोस्तरध्यै विते राज्येन्बीगवदैध्ययोः स नित्यः सर्वत्रात्रैव तृतीयायां त्वाश देव्ये न्यायवन्दचाय्य इत्येतौ शब्दौ मरायै शेप्या भारद्वाजे व्यस्थिरन् प्रडिडे वन्तास्यस्वारकावत्रीय-योस्त्वमिन्द्रत्वं वृत्राणीन्द्रस्य यशसि त्व वृहस्ये त्येतौ शब्दौ द्विहिङ्कादैव्ये त्वस्यन्ये यशसि हस्यभीवर्त्त-र्पिता लोशे लग सुवीरः श्येने व्ये शब्दः शिशुन्देव्य-ज्योतिषयोः पुत्रेभ्यो भारद्वाजे प्रत्यशब्दो नानतरयोर्यु-ज्या विशोये व्रतान्यस्यश्यैतवाजीययोः पूर्वा मुखेधे स्युक्वभिः पार्श्वे हरिण्या सप्तास्वेभिर्वेलासु ॥ १

तवेसोमाभाभिहोत्येतौ शब्दौ दैर्घे घ्रानाश श्रुध्ये पृणाध्वङ्करवतरे जातमार्यज्ञीये पाद्युत्वामिच्चरौरवे द्य-ग्निभिस्वरत्य स्तावे नैपे दुर्यन्तुग्यता चान्बीगवे न्यै-रयज्ञीये त्वां दूतं ग्नीये शग्धूहारमानवयोस्त्व ह्वी हि

जम्भे त्वम्युङ् कौल्मजम्भयोः प्रयत्यकौत्सेग्र्यः कालेये पूर्याः सञ्जये वीर्यस्यख्यस्य वारे श्रुधीहवायां माद्ये-पृष्ठे सख्ये श्रुध्यनैतयोस्तूग्माः पूर्वं व्यनहृत्वे क्रतु मित्येते शब्दाः श्यैते पार्थे हर्यशब्दस्य दैव्ये वाहधं न्यञ्च दैव्ये सवाच्या नकिष्ट्वायोषत्या च वाशे सꣳ-सद्यत्वे दैवोदन्त्वग्रान् द्युम्नस्यमन्ते त्वमङ्ग काकुभे व्यूषाः कावे महत्स्वासन्त्वनिनि वीरसेन्यः सन्तनिहङ्गिर-योरोषधीभ्यो च्चौये मत्स्यबृहति दधे वार्याणि कमश्व स्वर्णज्योतिरुत्तरे कमश्वे स्वशब्द एनाश्रुध्येदश्र्या बृहद्रथ-न्तरयोर्वर्हात्वꣳ श्रुध्ये वृषावषट्कारणिधने काव्यं नाभ्यासे त्वांहविन्द्रगामश्वमित्येते शब्दास्त्रयो वारे त्वामित्वाङ्काष्ठासु प्रतिहारे बृहतित्वाꣳ समाहेष्विन्द्र बृहत्तरे त्वाꣳशब्दौ पूर्वंष्विन्द्र च जम्भे जनित्वाश्येने वीर्ये व्यबृहतोरन्नैव काम्यं दैव्ये सक्ये स्फिग्यं च रथन्तरे यामे व्यख्यत्सोवा रथन्तरे स्वोवा रथन्तरे ॥ २

आयिःकारस्य भे स्वरे प्रत्यये ग्रहणौर्विसर्गलोपः स्याभिर्यस्ते सुरूपे श्यतिरभिद्युम्नतृतीयायां वाचः-साम्नि भिः स्वासु त्रिशोये शुचिः परिप्रियायां मार्गी-यवे गृविः प्रसोमदायां कावतरे सुतिः पिबात्वस्याभि-निधने काण्वे नृभिर्हदिरिन्द्रोमदायां वार्हद्गिररश्मयो

वैरीः स्वासु रश्मे गिरेर्वृष्णिज्योतिः स्तावे प्रत्यु बृहति सोमस्पतिर्हं प्रत्यये सहस्रधारायां त्वाष्ट्रीसाम्नोः स्वर· प्रथमे चारिष्टे चानादावद्रिरभ्यासे प्रत्ययेक्रायां वैश्व-ज्योतिषवात्सप्राकेंषु नकिर्न्नकिष्ट्वद्व्यायायाꣳ स्वशब्दे प्रत्यये गौरीवितासितयोः ॥ ३

उःकारस्यौहोत्रायां प्रत्यये ग्रहणे विसर्गलोपः पृथुः सांवर्त्ते क्रतुः परीताध्यास्याया मायास्ये त्रीणि वितायां वार्श्रे परिप्रियायाञ्च मार्गीयवे क्रतुरिन्द्रक्रतु मित्यत्र छन्दस्येतनिते ष्विन्दुर्धर्त्तायां वासिष्ठे रहस्ये च योधा बृहति वाजयुः सदोवनाया मन्तरिक्षे सजू-रग्ने बृहति विसर्ज्जनीयाकारौ जीराः सैन्धुक्षिते निकामवितश्शृङ्गयोर्ज्याकाः प्रोषुवत्सास्वःकारो गोमन्नः शुध्ये समुद्रः प्रथमः स्वर इमाउत्वायाꣳ श्यैतनौधसयोः स्वः शब्दः पूर्वः पूर्वे योक्ते स्वः शब्दस्यैवातिहारप्राप्ते लोपः क्रियते सिष्ठवैशोकयोश्च योक्ते चोत्तरयोर्मरा-येऽभ्यासे प्रत्यये विसर्ज्जनीयस्य चालोप मेके वि-रामे ॥ ४

तकारलोप उच्छन्दः पार्थुरश्मे यदुदीराया मि-लान्दे च वर्च्चे प्रत्यये परिमड्विषत्स्वासु हारायणे दृढाचित्स्वासु वीङ्क्ष्व्यासे प्रत्यये वोवित्सनइन्द्रायाꣳ

सौमित्र इन्द्रोमदाया मिच्छब्दः पार्थुरश्मद्वितिहिङ्कार-च्चौययोस्त्वमिन्द्रपरित्ययोः पुष्टैश्वामित्रे प्रसुन्वान-द्वितीयायां तवेत् प्रत्य-बृहति मकारलोप उत्स न कन्दैर्घेभ्यमिद्दीत्यच माऽसूर्य मायास्थे सातमिके लवायां मनोषां च्चौद्रेषु सहोदैर्घमरायवैराजर्षभेषु स्वसामैटतेभ्यासे प्रत्यये सई चिकबृहति पप्रौ यज्ञाबृ-हत्युकारलोप उपदृगयऽसूर्याया मैटत उत विषाद्ध जनितायाऽ श्यावाश्वे यकारः परिष्टोभन्त्येत्यस्मि-ञ्छब्दे दवि-च्चौये वा शब्दः सफे प्रियन्दे वायां प्रथमतृतीययोर्विकल्पयोरकारः सनैमिवाया मदे वऽ शुध्यतैतष्कालेष्वघायोर्वारे प्रथमेभ्यसः चुल्लका-श्चौगवयोर्वृद्धादचरद्वैटन्वते प्रथमे इयुः सिमास्व-चरन्नब्रुवऽस्त्वाष्ट्राद्ये ग्नये च्चौय आकारस्तन्वावि-माया मिहवद्दाम इकारः प्रसोमाश्वे व्यञ्जन मप-राङ्गं विरामे लुप्यतेभ्यासे च नैर्मयेर्षसाज्जुन-च्छभूस एवामृता चार्के आकारोनुनासिको वृद्धः सर्वतारेव वैखानससन्तनिषु ॥ ५

आउवाव्यवहित माउ भवति सर्वं पदान्त्यं च व्यञ्जनं लुप्यते शाता२३ उवा३ भवा२ सियो३ वा ऊ३ ग्रा३ उवा३ शर्म महो२३४ वा३ यू३ जा३ उवा३

वाजेषु चो२३४ वा२ मघा३२ उवा२३ एवञ्जाती-
यान्यनाउभावो भृगणवतरे रेत: श्येनेषु पनः सन्त-
निन्यशिश्रयु: प्रेवङ्गार्गव औष्ठ्यस्वान्तःपदिको नाउ भवति
सर्वत्र यथा मा३न्द्रो३ मा२३ दा३ यता३२ आ२३
उवा२३४५ ओणन्तो२ गो२ भिरू२आ३उवा२३ मकञ्च
न योनिं सोमसाम्नि सीदञ्छ्यना२३४हा२इ ना३
या३उवा२ नाईमा३उवा२ सुनेतसौपर्णऊर्मिणावाम्-
मैधातिथयोर्वर्ज सदस्यवप्रवद्घत्सामराजेषु स्पर्शान्तम-
लोपो यथाद्युम्ना२ निमा२ नू२ षा२ णा३४ माउ
सहस्रिणा२ मा२उ घाजिह्विया२३४ मा२उवन्मधुमा३
स२ वीरिया२ मा२उतिरेभा२ नाउधृता२ वसाना२:
पा२ रिया२ सौ२ निर्णिजा३ मा२उ श्येनानयो२नी२
म्यार्त्तवा२न्ता२ मा२ सदा२ दा२उ न तिष्टुप्शिशुमु-
द्यति सो२ मो२ वा२इरा२३ जमनू२ रा२२ जनिष्ठा२
१उ रहस्ये च न सर्वं माउ भवति व्यञ्जनं च न
लुप्यते यथा वाजीयनित्यवत्सातीषङ्गसिमासु यत्राउ-
भावो व्यञ्जनलोपश्च तद् वक्ष्यामः स्वरान्तः कण्ठ्यः सर्वत्र
त्रिणवे सहस्रिणा मिति यज्ञावापत्स्ययोरङ्गारैवतयोर्व्यं मः
कारस्य रैवते सिमासु सर्वं माउ भवत्यन्तगन्ते छान्द-
सीषु दिशोवसोरारणाङ्गोनामन्तगन्तेषु चाचारित्यस्य शब्दस्य

रेफलोपः स्वरघोषवत्सु प्रत्ययेषु ज्योक्कः शब्दस्त्वो त्वꣳहे स-
कारलोपः अवस्तमः साह्वान् विश्वायाꣳ सꣳहिते सुश-
स्तिभिरिलान्द्द्वितीयायां मानस्तरभिजमवर्त्तथादौ
लोपः पराङ्गं वा सुहस्ता स्तावे त्रीयस्य लोपः पराङ्ग
वेन्द्रायेन्दविति क्रौञ्चे वलोपः सन्धावुगतिर्विरते द्वियं-
कारसंयुक्ते विक्रुष्टे पूर्वो यकारः प्लुत आकारः सम्प-
द्यते रयिꣳसामश्वा३आ२या३यि क्रौञ्चे निधनत्वात्
पावार मानार अवा३४५ या२३४ पायाशब्दः क्रिण्ड-
पाय्योमहेनायां च प्रणपा२त् कुण्डपा२या२४५या३ः
सत्यश्वसि वाय्य अवृद्धस्तोभात्पर इकारः सम्पद्यते
दा३यिꣳसो३मश्वौ२हो२ वाहा२इ या२म् ॥ ६

अनुस्वारः स्पर्शः स्ववर्गीये प्रत्यये रेफस्पर्शोष्मभिः
संयुक्त एते शब्दास्त्वयोन्तःपदिकाः स्तोभव्यवहिताः
सर्वत्रातिह्रियन्ते स्तोभान्ते विरते लोपः सन्धावलोपो
बर्हिषितर्तुराणापिशङ्गमोशानकृद्घशꣳससराꣳसिसꣳ
हमꣳहत्य वञ्जातीयान्यतिहारप्राप्तं व्यञ्जनं लुप्यत
आनꣳश देव्ये ज्योतीꣳषि वृषन्नदर्शि वारे वर्पसो-
दर्शतेत्वान्देभ्यसः स्वारे पर्णे प्रशꣳसन्ति विशो-
याभ्योगवयोर्हिन्वन्ति विशीये मन्दानङ्गीर्भिर्जनित्रे
धर्म्मे दैर्घे बिन्दुः सिष्ठं इन्दव उद्वꣳशीये कर्म्मवत्सा-

यर्वणे सर्वं तन्दुक्कार्त्तयशे स्वरान्त मेके विसर्जनी-
यान्तं वा स्वासु भरे यन्तुरं लोपः पूर्वाङ्गं वा कश्चित्
पदान्तो लोपः प्राप्नोति ह्रियते कश्चित् पदान्तः पूर्वाङ्गं
माप्नोति ह्रियते वचनात्प्राक् स्तोभस्य स्वरान्तो विरामः
स्तोभान्ते विरते लोपः सम्भावल्लोपो जिष्ठा अधयद्दि-
मामा९ सदोविशोयोत्त्वेधयोत्त्वेधयोः कुत्रिदस्वासु मार्गी-
यवे चिक्रदृत्यवमानाभ्यर्षसीत्यत्र करवतरे पुरमजीजनो
हि देव्यं स दुरितायै ददति देव्य उषर्बुधोग्नेविवस्वदैव्ये
गिर्वणस्त्वयाभूषन्ति मानवे सत्पति मिन्द्रविश्वायां
लेये जम्भे च त्वामिद्वीत्यत्र मध्यमाउवाव्यवहितं छिद्र-
मैधाङ्गोरूपेष्वृतमाउवाउवाव्यवहितं पार्श्वसन्ताच्छि-
द्रमैधाङ्गोरूपाग्ने स्त्रिणिधनेषु ॥ ७

शवसः सञ्जये सरद्गौतमे निष्कृत९ रुणसाम्नि
वृषो अचिक्रायां वयु मपघ्नन् पवसायाङ्काचीवते ध्यम
मैषिरे मरुत्यवमानो रथीतमायां कूलीयसन्तनिषभेषु
दूराह्वन्तीये प्रथमे रसं मार्गीयवे हयत्व९सोमासि शा-
म्मदे द्रि९स वह्नितायां वितशृङ्गयोरुभय९ स्वासु मैधा-
तिथे सं मविचाया९ सामराजे तद्यज्ञायथाद्वितीयायां
बृहद्रथन्तरयोर्यच्छन्दस्तन्न वहहतीन्तरे प्रत्यस्मै-द्विती-
यायां धत्विषीमायास्च वत्सासूतप्रशं९सायां विशोय-

ञ्चीययोश्चित्तदद्यायां वन्तीये महद्क्रान्वासिष्ठे रहस्ये च माभेम बृहत्यहि९ स्वारे पर्णं घतः पार्श्वं मेषु चायां नप्त्रोः परिप्रियाया९ षूत्नौसायिवयोर्गीये चर्षणीयं-ओजिष्ठायां ज्योतिरौपगवे पवमानो अजीजनाया मर्वाङ्न्निलोप मेके कावे विते श्रुतिं युंद्वाहि केशिनाया मुभयतः प्रभोः शैखण्डिने हरिं वोञ्च शाक्वरर्षभे भीके विपः स्वः सर्वत्र यथा स्वर्विदः शाङ्कुनि साहीये च स्वर्विदा नामैधे न स्वे प्रत्यये सिष्टन्नैशोकयोश्च सिष्ठ-न्नैशोकयोश्च ॥ ८

अक्षवादिपदान्तात्स्वरे यकारो व्यवधीयत उप-दान्ताञ्च वकार१ विकर्षे सर्वत्र चालोपः सन्धौ विरते लोपो३ बोधिया३ त्रिवरूथ९ सुवस्तया एवञ्जातीया-नि न प्रतीनि वर्त्तं जठरेषूहल्कावावासिष्ठाभिक्रन्दार्केषु पृणातु महामित्रवाष्ट्रीवितेषु येवास्तजन्ति लौशशैख-ण्डिनयोरदर्शि श्रुध्ये वृत्रेषु सप्तहे ह्यन्तस्थपरे तु लोपो यथा काष्ठासुनरक्त्वा२ङ्का२ष्ठासु आ२३वतः स्तोभ-व्यवहिते त्वलोपो ह्यन्तस्थपरे यथा भीकषूक्तयोरैटते त्वभ्यासे प्रत्यये वृद्धात्परौ यूौ लुप्तौ तन्वा२गिरः सुष्टु तयो२वाजया२३४त्नौ२ आ२जिघ्रगा३द्वसू२रो३ आ२३४ तू३षूआ३ एवञ्जातीयानि न भूम्युत्वासंचारे स्वायु-

धोत्रे सिन्धूनां मरुतामिनौ स्वाश्वौशने च स्वश्वो नकि-
ष्टुद्रथायां प्रियासितयोर्मंदेष्वस्येदिन्द्रायꣳष्कालदास-
योर्यज्ञायस्तु सर्वत्र बृहद्वाक्प्रवैराजपदनिधनशुद्धी-
यवर्जं नदीषु प्रियः सूनायां यौधाजयदैर्घश्रवतरेषु
धर्त्तायाङ्गावत्वासिष्ठाभिक्रन्देषु सतेषु त्वयाभूषायां माधु-
च्छन्दसमानवयोर्वृष्णौ प्रमꣳहिष्ठीये वनेष्वर्षासोमा-
याꣳ शाकलवार्शसन्निवर्त्तहरेषु ॥ ९

पृच्छेषु सुज्ञानेस्वाध्यः सोमाः पवन्तायां वितमधु-
निधनान्यौगवषेधज्ञीयेषु संवरणेषु प्रबोयायां प्रवह्लीश-
धिसारथ्यपामीवसुसूनि पवमानरूचायां विशीये मत्स्येषु
दानाय वार्यायां लेयश्रायन्तीययोः कविमिवायां चौ-
शने व्यश्नुहि संज्ञारे पिबात्वस्यवर्त्ताभिनिधनयोरव-
न्त्यस्य सामराजे स्वस्तये दवि-द्यौये दीया-द्यौये स्वाहुतः
सदुद्रवायां वारदेव्ययोर्वृहति च गीथे दीर्घवृद्धोपहित
द्रूपदान्त आद्भूतोकाराकारयोः प्रत्यययोः सन्धौ य-
कार मापद्यते गतिर्विरतो वा३यस्व्यद्रो२३ पवमाना-
भा३४याषां३४सा३ एवञ्जातीयानि नार्षसि पुना-
नायां यथा गौङ्गवाभीवर्त्तयोर्भवीयसी प्रमꣳहिष्ठीयेस्व-
न्त्युहꣳशपुत्रे विश्वान्यर्य्यआपर्सैंटतबोधीयर्षभेष्विन्द्रा-
यच्छन्तिसुचस्वरन्ति नैपे दधि-यज्ञीयक्रौञ्चयोः स्य-

ष्विनोर्बोधीये धाह्यग्ने कमश्वे स्यतमा सहोर्दैर्घ-
षभायोर्वैराघि त्त्रीयस्यावाश्वयोरेकारे च यकारं या-
मोहृतोर्गतिमाऽश्व पदान्तःसन्धौ यलोपो विरते रस-
ता३इ येर३स्यापरा२३ये२३ वमता२३ये२१ एकारादः-
काराच्च भोगः क्वचिदिकारा दोवैकारयो रेकीभावे
लोपः ॥ १०

वृमन्तःपदे तालव्य मा भवति हाईा स्तोभे प्रत्यये
प्रतिभागं न टा२१ हा३इ प्रप्री२१ वयमम्रतञ्ज्ञाता३ २३
वा हुम्माइ महाहस्तीदचा२३हो३ एवञ्जातीयानि न-
ह्निवितवद्यौरिन्द्रायाऽ सैाभरे चिक्रमृज्यमानायां
रभ्रोत्तरवाजजिन्मन्तेष्विव दुहानायां पृश्निमन्त्योर्गाय-
त्त्रिवायां च त्वाष्ट्रीसाम्नि कनितिस्तोत्राचायाऽ सैन्धु-
क्षितैाशनयोः सऽहिते त्वा भवति वारे सर्वान्तःपदन्ना-
भवति स्वास्वा भवति निमर्त्तग्राहने विष्णवद्रत्येतैा
शब्दावर्षासोमायाऽ शाकले वरिवः सनइन्द्रायां कैात्से
पव्यध्वर्यैा सार्के सवीरायां वैश्वामित्त्रे डिन-द्वितीयायां
त्वाऽरिहन्तीत्यत्र च त्वाष्ट्रीसाम्नि रभिसुषावसोमायाऽ
रैरवे रहस्ये च संक्रतिनि गैाशृङ्गे स्वर्विदः सुम्नेषु
मानस्तरभीभीत्यत्र जमदर्त्त्रषेधर्यामाशिवासः प्रहिन्वान
इति च पूर्वे जनित्त्रे गीर्भिरुत्तरे श्रैाणा हविषि सवा-

ज्यचायां भवे जिपवमानस्य जिघ्नतायाच व्यथयदिमाया मुत्सेधे हिन्वाभिसोमायान्तनिभीशवयोर्हौर्घनिषेधे पुरोजित्यां जम्भलरयोरनाभावस्तालव्यस्थान्तःपदिकस्य दीर्घशब्दस्त्वा भवति पुरोजित्यां जम्भे स्वरे चा भवति सहावाण्इन्द्रेत्येष शब्द आनस्तेगन्तुमत्सर इत्यचावृ मप्या भवति जितीयो दी क्रौञ्चे षि परीतायां माधुच्छन्दसे वरिवः सनइन्द्रायां मार्गीयवे जरि स्वारे पर्श्वे मदिन्तमदिष्ठनीगि हाविष्कृते यितवे श्विनोर्व्रतान्तरे ॥ ११

पदान्तस्था भवति मातिग्नितमधायां कमश्वे धैनै वारोत्तरे त्रीये स्यन्दते क्रावते चर्षणोरधोत्यर्षिहावि ष्कृते वरिवोधायां तु व्यभीनः कौत्से वृषेस्मान् पिबासुतायां पृष्ठजमवर्त्तयोः पवन्तेभिसोमायां मैधातिथे निष्कृतए रुणसाम्नि वृषो अचिक्रायां परीतायां च परिस्त्रवाधिसोम उष्वा वाम्रे सुष्वाणायां चाश्वीगवे भिप्रि-त्रीये चोक्तः कपे स्वासु नैपे विद इन्द्रसुताया मुद्वएशौये मधुनिधने त्वचि सुष्वाणायां जितवे पुरोजित्यां प्रते शैखण्डिने पातवेनै सएहिते शसयेतं तन्वामदायाए सएहिते गविष्टये भिद्र च्यावने दिवे त्वाष्ट्रीसाम्नोः सहस्रधारायां मादेनै

रेवतीष्वति-छन्दसायां महानाम्नीष्वभि ष्वैते तदिदास-
तृतीयायाम् ॥ १२

॥ इति सप्तमः प्रपाठकः ॥

यकारे च प्रत्यये ह्रस्व मन्तःपदे तालव्य मा भवति
यत्र यकारसंयुक्तं विकृष्ट९ स्तौ२षि२मित्रमिवप्रा२३४
या९सो३मा२३विश्वा२चा२३४या३ एवं जातीयानि
न रथ्यं महस्तवानायां काण्वत्रृहति रहस्ये च बृहति
नर्यः सनो हरीणाया मित्यवैते वाम्रे च परीताया मत्यो
धर्त्ताया मुहद्भार्गव ईयतुस्त्वमिन्द्रप्रतूर्त्ति ष्वित्यवाभी-
वर्त्ते पीयन्त्यभ्रातृव्यद्वितीयाया मामहीयवे पीयत्नवे
मानइन्द्रायां वारे स्फिग्यं माभेम बृहति हीयमहे
नोत्तरयोर्वाजीये तृतीयमृतस्य जिह्वायां ना भवति
सर्वत्र चीये त्वा भवति पदान्तस्था भवति शर्मणि प्रदै-
चीये काण्वे रन्तास्वरे च वियस्तावद्ध मथा भवति
प्रियः सूनुर्वर्वतरे सम्मील्ये जिह्वं न क्रतवस्याधिया-
बृहणाध्यैनौ वारे प्रथमे पवस्वदा सुम्नानेङ्गादा
शङ्कुनि विष्टया वाचःसाम्नि वयुना वासिष्ठे दिवि
यज्ञायथोत्तमायां बृहति क्रत्वस्तौरश्वत्रसि ॥ १

अवौकारयोरनन्तरः स्वरनीचाद्ययोः प्रत्यययोः

सर्वं तत्र मा भवत्यन्तलोपश्च यथा भरनार्मेधैश्ववाहनि-
हत्रसाम्नेषु न क्रुष्टोतविशीययो रथापवादा राग:
स्वःपृष्ठनैपातिथरश्मेषु संग्रभा तून इत्यचाकूपारे-
दूरेदृविराट्सु देव्ये तकार: परिस्वानाया मैधवाहे
मकार: कार्त्तयश मन्तयो रापृष्ठ्या सिधे रथी नार्मेधे
प्रायश्चित्तेषु पार्थुरश्मे स्वाशाःकारवर्ज मोकार:
सखाय: सो शाक्तो मदाय तानवे वायुमारो भासे
महा श्वारसि वाशे सूर्यमरो नैपे सुषावसी च्छन्दस-
द्वैगतयो स्तोगो द्वैगते सोमसुत्वाने भुवनो टते
पिन्नाबोत्सेध उवसं तु न सर्वत्र भवति ग्रहणादा
भवत्युभ: स्वासु मैधातिथे न:सू वारे प्रथमे प्रिय:
सूनुद्वैगतगौङ्गवयो रिन्दुर्गौतमसाम्नयो रकू सिष्ठप्रिये
यदिन्द्रचित्रायाः शिशु सर्वत्र ॥ २

ऋगन्तीय: स्पर्श: प्रथमस्वरो नामि विसर्जनीयश्च
ना भवति तत्र चौहो शब्द: प्रथमात्क्रुष्यते सदादा-
२३४ ह्वियामा२३४स्त्रियोरा१२३४ एवं जातीयानि देव्ये
त्वनृगन्तीय: स्पर्श: प्रथमस्वरो नामि विसर्ज्जनीयश्च
ना भवति तत्र चौहो शब्द: प्रथमात् क्रुष्यत आ३वि-
तार जरा३इ तृणा३मा२३४आ३हू२महिश्रवस्यवा२-
प्रा२युभा३इरा२३४ तुरीयन्त्वा भवति शिशुन्देव्ये स-

चमा२नः समु२द्रं २तु२रो२या२ औ३४हो२इाई रहस्ये लृगन्तीयस्यान्त्यगन्तीयस्य स्पर्शः प्रथमस्वरो नामि वि-सर्जनीयस्य ना भवत्यृगन्ते त्वेव प्रथमक्रुष्टस्तोभद्र्लान्द-द्वितीयायां तृतीयाद्रिन्यामौहोवायां चतुर्थस्थो वृद्धः पदान्तः सर्वत्वा भवति यथास्यशिशुमकान्वासिष्ठेषु श्यैतनारयोश्च तत्रापवादो रागोघ्न बृहति मस्यबृ-हति स्वरः प्रत्यबृहत्यमेग्ने बृहति जुष्टो यत्रावृहत्यु-ज्जीये पूषा बृहति गावः श्येनोत्यः सिष्ठे वृषो चायास्ये वृषा२३४औहोवाइन्द्राचक्षःपृष्ठा३इन्द्रो२३४ औहो२३-उवर्णं तु न सर्वत्वा भवति ग्रहणादो भवन्तीन्द्-खिकबृहति शिशुम् सर्वत्र ॥ ३

आकारोन्तःपदिको ग्रहणादो भवति नमोघो व्यञ्चा म्ना२इन्नमा२३४औहोवा३ तोमघा३४ औहोवा२ तालव्यं च द्वितीयात् क्रुष्टं तालव्यम् हाईशब्दस्या-भवत्योस्तोभे प्रथमादौ प्रत्यये श्रिया२३४ औ२३४ वाहा२४औ१४हा३४औ२३हा३हाई स्वासु नकारः आयन्तीये दा२नाया२चो३ ऊं ३दया२औ२३४५ वा२ शुकारमकारौ च वृध्याल्मिबास्वरम् सर्व मा भवति या-स्तोभे प्रत्यये वच स्व नादभन्नित्येवाङ्गतीयानि मा२इ तेवचा२२या२३४ औहोवा२चा२नादभा२२या२-

३४५औहो२वा औशायवर्योस्वो भवति कविक्रतो२३ या२३४ औहोवा३ ऋतावृधो२ या२३४ औ२ हो२ वा३ पनिष्टयो३ या२३४ औ२ हो२ वा२ चरेवारिहत्या० सर्वं श्रुधीहवाया० स्तोत्रभ्यश्चौकारोन्तःपदिको ग्रहणादा भवत्येकारहकारयोः प्रत्यययोः कावयामवाम्नसोम-सामसु नामहता२३ड यमधिराए३ दुरिता३ सा२३४ ए३ सुषा३ हो२३ड वसाहो२३ श्येनी३ नाया२३४ हा३ अग्निगविल्यवात्व मौकारे प्रत्यये रयिष्ठे वृद्ध० सर्वं मा भवत्यौहोस्तोभे सस्वरे प्रत्यये रेवतीन्नां औहो प्राणाशिशा औहो सा औहो नेन्द्रस्ते सोनहितेपूर्विश्व-स्यटूज्योतिष्कृणोचोदेथा०सूरागश्च पुशब्दश्चेलान्दे रथ-न्तरे सर्व मा भवति स्पर्शगभस्तोर्वर्ज्ज मोस्तोभे प्रत्यये-ग्निनोर्व्रतपूर्वं च तालव्य० शाक्वरर्षभे त्वोष्ठास्पर्श वर्ज मे स्तोभे प्रत्यये वृषणिसर्वं मा भवत्योवाया मनन्तर-स्वरनीचाद्यायां प्रत्यये प्रत्यये ।। ४

ऊहगाने योनिवत्स्वराः स्तोभाभ्यासविरामा अन-भ्यासस्तुतच्छन्दसां विकारा हि प्रत्यच्चपरोचादयस्तेषा मुक्तो नियमोऽतोऽन्ये नियमाश्रयाः पर्वाश्रयाश्च तेषां नियमाश्रयाणां यथैतच्चतुर्थमन्द्रातिस्वार्य्याणा० स्वरा-णां ह्यन्तर मुच मुच मुटूहो दीर्घकर्षणस्य वृद्धिर्नन्दायाः

त्सिव्यकर्षणाङ्गतेरेकारभावमाम्नाया एकारनिवृत्तिः स्तो-
भाना मुद्धारो गणगीताना मन्ते निधन मेवमादयो
नियमाश्रया अथ पर्वाश्रयाः कृतस्वराणि पर्वाणि
परिमिताक्षराणि छन्दसि तेषा मूहे ज्यायसि छन्दसि
यथान्याय मावापः कनीयस्यादितो लोपः पर्वणाॅ
सङ्घातानां च शुर्मदायास्तु न्यक्षराया उपाद्यलोपो
वारे लेयप्रस्तावसहृश्रेष्वविकारो गायन्त्याद्यायामा-
ष्कारणिधनवदिन्द्रायाह्य त्तरयोर्वयमुत्वावत्काचीवत-
उच्चावद्दे व्य आकाराकारयकाराभ्यास एनातंवोग्नि
मिति निधने च नित्य मोत्वङ्गौषूक्ते तूचातायामूनेषा-
शब्दाभ्यासात्सम्प्राप्तिः क्रौञ्चे च हिशब्दाभ्यासाद्वर्ते
चेकाराभ्यासात्साहीयगूर्द्दपुत्रेषु चातः परं पर्वविका-
रान् वक्षामो यदधिकृतॅ स्वरतः पर्व तद्यथा योनि-
स्वरविकाराद्यदन्यत् पर्वापद्यते तत्तेनैवोपदेक्ष्याम आम-
हीयवमध्यमाया मुग्रॅशर्मा ररिमाताॅ स्वासु कम-
श्वोत्तरयोरेभिर्वर्द्धा प्रवद्धन्द्रा सायः प्रमध्यमायां तु
मरा मग्निष्टुन्नौधसे ध्यमायां मागायताम्बाङ्गास्वरोत्प-
तिश्च प्राक् प्रहूयसायाः श्यैतधसत्टतीयायां चानुष्टुप्सु
वायिश्यतातयां कावे स्वासु भिशब्दादकारागम उद-
पन्नायां च वाशब्दे च नित्य मोत्वं पोरुह-

न्मने सोत्रामागायताञ्जास्वरोत्पत्तिश्च प्राक्कृता-
याः ॥ ५

पृश्निनि तृतीयपादान्ते च दक्षसा पतिः कवी-
पृतातूतद्विषां पतिः कच्युत्तमे च जमवत्तें ध्यमाया९
रनोनुमा चदक्षसां पुत्र उत्तरयोर्नेमिस्त्वन्नां यमस्यु-
त्तमाया मुत्तरा तयानन्दामयन्दासोत्तरयोर्जरिसङ्गातं
कार्ष्णश्रवसोत्तरयोर्जुषे जनासदावृधां मार्गीयवे मा-
गायता प्रथमोच्चं प्रसोमप्रथमाया मस्यपत्वाद्ययोश्च
वृषाजिगप्रथमायां च घृतनिधने च्छतानुव मित्यत्र
स्वरागमो हविव९शब्दस्य चोङ्गाव इद९सङ्गातस्त्रिष्टुप्सु
पार्थवाराहवासिष्ठकुत्सरथीयादिषु वाराहे शुचि त्वावृ-
धन्ता तरुतां पार्थे तु वृष्ण्याये हौषौं प्रकृतावूहे द्वितीय
मनुष्टुप्सु त्वभु सङ्गात माज्यदोहयौतानयोर्जुहूसङ्गातं
विच्छदःसु च वैराजर्षभारिष्टयोर्वाम्रिध्यमपादयोश्च
दक्षसोतद्विषामत९ हि मह्ने प्रथमोच्चस्य चतुरक्षर
माद्यं पिबासोमां परं योनिवत्यष्टौ होत्तरयोर्वृष्णौ
तद्विविद्धां प्रम९छिद्वितीयायां वाघाह्नीयेंदेवां तद्विवि-
द्धावृष्णोमह्ना वात्सप्रे वृधन्तादेः कर्षणप्राप्तस्याकर्षण-
मूत एका च द्वितीयमभ्यासश्च चौद्रे तु वृणी प्रथम
मपुरोज्यूत एकायाश्च त्वावर९ साभ्यासं मानवयोः

पूर्वे च दक्षसा पतिः कवी३ शुर्मदा चैकर्चे लुप्तो-
पान्त्या तरे चैतस्या मेवान्यत्र शुर्मदायाः पूर्वस्या
उपान्त्यं नोचं भ्राभ्रवलाष्ट्रीसाम्नोश्च दक्षसा पतिः
कवी३ रस्योत्तरे शुर्मदेतरयोर्ज्ञातः पृष्ठाम् ॥ ६

शने प्रेष्ठंवाजुहोतामयोनावुष्णिक्षु च कूलीये
वैश्वामनसे राथीतमासव्यख्यदूर्न्दां वं३शीये गायन्त्या-
वाया मच्छाहोतारं व्यो चतुरक्षरशः परयोस्त्वक्षरे
ऽच्छा पश्चाक्षरे होता क्षरे द्वाऽन्यत्र सुज्ञाने निधन
मेकिने स्वरं वाचःसाम्नि स्वासूक्तमायां तृतीय-
पादादौ च दक्षसेतद्विषां लौशयोः पूर्वे वारवन्ता-
तुविशुष्मा मुत्तरे चतुर्थोत्त्वं द्वितीय३ हृस्वारूपयोश्च तथा
शार्गे तृतीयोत्त्वं स्रवे वारवन्तास्तिस्रस्तृतीये पादे द्वि-
तीये तूष्णिक्षु चतुरक्षरा प्रथमा द्व्यक्षरे परे पूर्वे
जनित्रे च दक्षसेतद्विषा मतंवस्तृतीयायां तवमाण्डव-
इदावासिष्ठे चान्नैव तृतीयाष्टमं वृद्धं प्रथमाया३ रुणा-
साम्नि च घृतवत्यां तिथे च योनावाद्य३ शुध्यमानवयोश्च
द्वितीयं विशीये ऽधयदिमायां भे प्रत्यये प्रथमोत्त्वान्तस्य
वृद्धिस्तद्विषापतिः कवि३ साहोये शता द्वितीय३ सङ्क-
र्षात्तथा सर्वत्र स न्यायो मन्द्रश्चतुर्थ मयोनावैडकौत्से
च वसुरुचाया मेवाद्यस्य लोपो वाशब्दे च नित्य

मोत्वं चिते च हाशब्दे मेधे चायोनौ बोधीये वच्यन्ते
वा मित्यत्र स्वरागमो मान्तश्च रागं द्वाविशीये स्ताव-
हारोपायावान्तास्थेदौ पूर्वौ हान्तौ ॥ ७

श्रीयत्तु विशीयाद्यायां तद्विविष्ठा वृणीमहां
वैच्छन्दसे समन्ते दिवा नक्ता प्रथमं द्वान्त्रस्य वृद्धिर्वि-
ष्टारपंक्त्यां किमित्विकवृहद्द्वयोर्वृणी प्रथमं त्वसो
दैर्घं परांङ्गं नित्यमाचार्यनियमात् पूर्वांगस्य वृद्देव च
पूर्वकल्पः शङ्कुन्ये षस्यध्यमाया मकाराभ्यासोग्निर्वो-
वाजीयद्वितीयायां चैकारे च नित्यं दीर्घत्वꣳ शङ्कुनि
कौत्से द्विशब्दो वृद्धः प्रकृतावूहे दीर्घः सर्वत्र संयोगे
हृस्वो वाशौं भिद्रोणाग्रꣳशर्मामिषन्तीकायान्तद्विविष्ठां
प्राणा सर्वासु मनाज्ये लुसूतयावायोरनी मुत्तरयोर्य-
ज्ञामहामित्रोत्तरयोश्चतुरुत्तरायां विधायां वाजीवा-
जापिबासोमासु तरे जनित्वे पुरोजित्या मुद्गीथाद्यस्य
दीर्घत्वं द्रन्वते प्रथमद्वध्ये वप्रिया मुत्तरयोर्वात्वतुरे
गीथाद्यं प्रथमोच्चं मागायतां द्वितीये च पादे सान्त्वा-
तन्त्वाज्योतिर्वरुणासाम्नाद्यान्त्यरयोस्तृतीयोच्चात् परं त-
मु तृतीयायां तु विभाक् चतुर्थी मध्ये निधनानि
निगदवृत्तीनि प्रयोगवस्त्वाधाराये गिरागिरा प्रप्र
नशꣳसिषं तस्य षस्त्रेत्यनुब्राह्मणꣳ स्वाध्याये देवता-

नामधेयान्यथ निरुक्तेष्वेके यथादेशं च कालवन्निनामनि प्रवचनविहितः स्वरः स्वाध्याये तथा शाट्यायनिनाꣳ समानोदर्कैषूदर्कस्योद्धारः पूर्वयोः स्तोत्रीययोर्महिनायां तूपान्त्यं पदम्प्रतिस्तोत्रीयं वाजीये सङ्घातैकत्वात्तथातिच्छन्दःसु नित्यवत्सासु त्रिकबृहति च पर्वैकत्वाद्दिमꣳस्तोमसमन्ते च द्व्यक्षरं पदꣳ संक्रष्टत्वात् ॥ ८

प्रतिस्तोत्रीय मार्च्चिकानि निधनानि स्तोभाङ्गभूतानि च पर्वाङ्गभूतानि च तथा हायिकारस्वारपदानुस्वाराणा मन्तःसामिकानि च स्तोभिकानि सामान्तिकानि सामान्ते सर्वत्रान्यत्र गणगीतिभ्यः प्रतिस्तोत्रीयं बोधीयधुराकमश्वयोः कण्वबृहति च निधनोपायान्ताः स्तोत्रीयाः सर्वत्रेडाभिरैडाना मिडान्ताः श्रुधियान्ताः श्रुध्यन्त्यक्समाः पगवयोरभ्यस्तान्ताः पुष्पाद्यरयिष्ठयोरुगत्यन्ताः प्रवद्दुहत्सामराजेष्वेकारान्ताः सुमाने स्तोभस्य सामाद्यः सामान्ते यथान्यायꣳ रहस्ये तूद्धारस्तस्य लक्षणोद्देशः पर्वाङ्गभूतस्यानुद्धारस्त्विरुक्तस्य सामादावाद्यं वचनं यथा भद्रश्रेयोरिष्टशाक्वरर्षभस्वाशिरामर्कसप्तहैकत्वषाणाꣳ श्रेयसि तु होशब्दस्य लोपो जम्भोत्तरसꣳस्तोभाङ्गोरूपाणाꣳ सामान्तेन्त्यं वचनꣳ संक्र-

तिनि स्तोभाद्यं वचनं प्रतिस्तोत्रीय मुद्भिद्बलभिदोः पूर्वस्यादौ परस्यान्ते भर्गस्य सामादौ स्तोभान्त्यं पदं वैराजर्षभे त्वन्त्यस्यान्तं वचनं यवत्वापत्ययोर्यथा ग्रामे वैराज इत्यादिः स्तोत्रीयान्तसर्वासु स्तोत्रीयाद्ये चाक्षरे मरुत्संयुक्ते ॥ ९

आज्यदोहानि प्रतिलोमानि तेषा माद्यस्य सामा-दावाद्यं वचन माथर्वणदेवस्थानस्वरान्तरितत्तौरश्रव-साना मविकारः सर्वौङ्कारोऽतोऽन्यत्र वैरूपे तु देवताना मनुङ्कारः प्रयोगसिद्ध्यर्थ मिहाथेड़ानाञ्चैकर्षे च देव-तानां निधनं तु सामान्ते सर्वत्र यल्लघीयो गुरुषु निधनैकदेशस्त्रिरुक्तानां मन्त्यं वचन मृषभे तु त्रिरुक्तं देवस्थानपूर्वयोर्निधनाद्यं पद मन्त्यायाꣳ सर्वन्दिवा-कीर्त्ये वैराजम्भ्राड्विकर्षेष्टास्वरम्भासे शत मादित्य-शसि सम्महे त्वाद्यं वचनꣳ साम्नोः पूर्वस्योपग्रहाद्यं पद मपांव्रते च गवां व्रते च कवान्तं प्रथम मश्वि-नोर्व्रतपूर्वङ्कारोऽतिक्रान्तो वैरूपशाक्वरर्षभपूर्वयोरद्वै-ड़ासामान्ते ध्यद्वाश्वव्रते हौ-हू-ह्वा-हौ-होन्ते षु चत्वारः सोमा वा औहोवात्मिवास्वर्ज्योतिः प्रथमोच्च मेकारा-दिकृष्ट मेवं पदायस्तोभाः परासु विधासु ज्योतिर्भाः शिशुर्वाजाश्वो सेध्य इति पादगीतिस्तुल्यापरयोरुद्धारः

सामान्ते निधनाय स्तोभाः स्वर्वत इति निधन मुपग्रहादिव्याहृतिसामानि पञ्च भूर्भुवःस्व सत्यम्पुरुष इत्येतासु पृथगग्निन्दूता प्रस्तावो मन्द्रे सोमस्विरुक्त आनीकयां तृतीयः स्वर्ज्योतिर्निधन मक्रुष्टैकाराद्य वथं सर्वेषा मेष विकारविधिरेतेन प्रदेशेनोह्यः सामगणः कल्पयितव्यः कल्पयितव्यः ॥ १०

॥ इति अष्टमः प्रपाठकः ॥

अथ विकल्पा रवउगतिर्मद्रमदोधनकामे पुरःस्वामूत्तरयोश्चारङ्गमानदेष्टे डरयिष्ठयोर्हिंत्वनादीदिहिस्वरा-मातान्नुवथंश्वामित्रेक्रौश्यमषष्ठं नवमात्र दीर्घे परयोर्दीर्घापरं नीचैर्ग्गं शृतीयद्दशमं क्रुष्टं सर्वत्र धर्मविधर्मणाः पञ्चाक्षरशो धनानि स्तावे हविष उत्तरयोः प्रथमे विराट्पर्यू च देव्ये गोथस्तद्दादिर्नवे निहोतातिधातुवारात्वसो दैर्घे गकारः शने राजन् प्लवत आसीफ तृतीयाया स्तुते न यानिबन् मध्ये जाम्नुतं प्रान्तयोर्वलोपश्चाद्य उच्चैस्तकारो यजिवाह इहायां प्लवते यशस्युत्तरयो रग्निन्दूता प्रस्तावे कवावहहल्युदा आ इति गतिः षभे काम्या त्वन्ना वारे पुना ववहहति प्रसोख्वतरे पुनाभिमा जम्भे चोत्तरयोः ककुभोर्विकल्पाः ॥ १

अथ भावान् प्रवक्ष्यामः प्रगाणां यैर्विधीयते। आर्चिं-
कं स्तोभिकञ्चैव पदं विक्रियते तु यैः। आयित्वं
प्रकृतिश्चैव वृद्धञ्चावृद्ध मेव च। गतागतं च स्तोभाना
मुच्चनीचं तथैव च। सन्धिवत्पदवद्गान मत्व माभाव
मेव च। प्रश्लेषाश्चाथ विश्लेषा ऊहे त्वेव निबोधत।
संकृष्टं च विकृष्टं च व्यञ्जनं लुप्त मतिहृतम्। आभा-
वाः स्व विकाराः स्व भावानूहेभिलक्षयेत्। एतैर्भावैस्तु
गायन्ति सर्वाः शाखाः पृथक् पृथक्। पञ्चस्वेव तु गायन्ति
भूयिष्ठानि स्वरेषु तु। सामानि षट्सु चान्यानि स-
प्तसु द्वे तु कौथुमाः। ऊनाना मन्यथा गीतिः पा-
दाना मधिकाश्च ये। योनिदृष्टाः समा येन्ये पादा-
स्त्वक्षरशः स्मृताः। आयेभावश्च नेदानीं दीर्घं यच्चैव
कृष्यते। कर्षणे तु निवर्त्तेते त्वायिवाया मुपद्रवे।
ओभावो दृश्यते साम्नैराभावश्च यथाक्रमम्। अभ्युदूहेन
सर्वत्रोहे गीती रहस्यवत्। स्वादिपर्वणि तिस्रायां त-
थैवान्येषु सामसु। आर्चिकं निधनं न्याये स्तौभिकं
वा यदक्षरम्। कृष्टाकृष्टम्भवेत् स्वार्यं मन्त्रोदात्तं दृधे
स्वरम्। मणाजनं सदह्नोना माविशासिविदेप्सुजित्।
त्वनाद्दयूं श्रियेतिभी रयिम्प्रियमभिद्विता। जसावस-
न्तमस्वम्मं त्सुतउडाः षिभिर्द्दयन्। न्यायादेतान्यपेतानि

श्वत एके हथेस्वरम् । वीभासपौष्कलाष्टेडरयिष्ठाच्छि-द्रधर्म्मसु । नैताश्ववतशौक्ताग्न्यौचतुःषडिडयोस्तथा । षड्भासे पौष्कले सप्त वौग्यष्टेडे पृथक् हचे । रयिशौक्ते वृषास्तोभे द्वे द्वे न्यायविरोधिनी । अश्वाग्न्यौगवयोः स्तोभधर्म्माच्छिद्रेषु पञ्चसु ॥ २

तृतीयोच्चान्त्यं हि स्तोभे दीर्घीभवति न वाम्ने स्पर्शान्तं व्यं च कौत्से चेकारोकारौ नश्चाध्वयवम-ध्यमायाः सनद्वन्द्रायां चौद्रे च क्रते चापदान्तो विशीये च पूर्वे शूष-त्रिणिधने चायास्ये सेधे षिणोदनः कामे च प्रथमकल्पे सर्वासु सौमे स्तावे कार्त्ते च पर्यश्विनोर्व्रतोत्तरे शङ्कुन्येकार ऋषभे च शाक्वरे सम्मील्ये लघुविनते त्वे कालेये महामहीयवे च क्रौञ्चाभिनिधनसप्तहपयउत्तरधर्त्तौद्वासदस्यवेषु वृ-ष्ण्यादिर्जितोश्च पूर्वं संयोगे मपोत्तरे स्तोभे क्रौञ्चे त्व-संयोगे नात्राविनेमिः कौत्से हि-शब्दः मवद्भार्गवे कृष्टादस्याद्वकारः स्वारे च पर्शो हारादू योनौ त्वम्-च्छङ्ग-प्रथमायाञ्च द्वितीयं सन्तः षं जनित्रे रथ-न्तरवृषाश्विनोर्व्रतेष्वोस्तोभे दैर्घं व्रात्योत्तरयोश्च येला-न्दतीययौक्तेष्वौकारे स्तावाद्यं कावतरे वैघने क्रुष्ट-वृद्वयोर्मध्ये रैवते च वृष्ण्यादिः साहीये च शतायास्ता

वात्सप्रे द्वितीयान्तः सूर्य्यस्य त्वेभिसामाद्यायां माद्य-
स्यान्त्यस्तोधीये मघोना मेके देव्ये दीर्घौ न्ववा-
वितदेव्ययोः त्सारशब्दः स्वरयोः ककुभे दयः श्येने-
नद्ध दीर्घत्वम् ॥ ३

श्यातेत्र होष्यन्तो वृद्धो शतमवे वारान्तोषतयश्च च-
दन्वते चाविप्रोहतिस्तावारस्वरान्तो नगशूपधान्यन्ते च
त्वाष्ट्रीसाम्नि हारादिर्योनौ नवपूर्वपज्रूणसामशोक-
पृश्निषु च नौदे दिरित्ते शब्दा अरिष्टे च ये वी
इत्येतौ शब्दौ समुद्रच्छन्दसि चोत्तायां द्वितीयस्थमरप-
विराजे स्तावाद् गेष्णादिरवृद्धः संज्ञारवैश्वज्यो-
तिषगोराङ्गिरसेषु नियां तोदे ज्यवे व्ये द्विस्तेजयत्रिणि-
धनसाप्तमिकेषु चथे सावादिरदेवः सिष्ठे तद्विङ्गाया
अन्तो योनौ रुणसाम्नि चरूपदो विशीयाष्टेडेषूर्मिणा-
ह्रावो जम्भे च तृतीयो दादि निंवे च पूर्वं दोवि-
शीये हारादिरस्थाः शृङ्गे च कौत्से वे सूष्वा-चतुर्थ-
मेकोना मन्ते राधाया अन्त्यानि वर्द्धन्ते स्पत्योत्तरयोश्च
तिरोवत्यां योनिवदाद्याया मन्तेत्र सर्वासु घृतनिधना-
यायां च शूवत्या मन्तवद्धान्त्ये होपरे द्वे शाविचोनाया
माद्य९ सङ्कर्षाद्द्वितीय मन्यस्यां वारे च नौ राहे नौ
तृतीये दे वृधन्ता तरुता९ श्रीवासिष्ठउतद्विषाम्पतिः

कवीमयन्दासोत्तरयोस्तृतीयोऽश्वाच्छतोत्पत्तिष्कलेजास्वर उपशिक्षायां प्राक् प्रहूयसायाः क्वथायास्ये पुनान इत्यव सोम० सोदे वृद्धे धौ चेन्द्रमच्छायां इगच्छराया मादि-मीढे मोच्चं नीचं हुयच्चं पितापवमानामाशिवासस्त्र जयसितश्चैतेषु शपेव चतुर्थैव वपा मन्द्रे ॥ ४

आदिद्दोदा तस्याहदुक्थरूपयोर्द्वितीयद्धं प्रत्युक्रान्तं प्राप्तं चाभिगीतं भीशवगतश्चैताजिगोत्तरनिचस्वारयामैषिरवास्रवार्षाहरवाचःसामहत्कप्रियेष्वग्र-र्मिस्त्रिहूंन्वन्नपोत्ताश्वावोधीये सर्वमयोनौ नित्ते च हविषि च गीथे न प्रवाज्युत्तरयोस्त्रेयानिधनयोरभि-हितपौष्कलहव्यगारमानववन्तीयभरपर्स्युयामसु ॥ ५

अथो स्वभावो वृद्ध माउ यत्पक्रत्या तस्य वचन म-पदान्तः समानं चनरवे विकल्पे प्रियावसु सिसीदतु भूरितेवसु न संल्लनिनि लिधनत्वात् सोम्यं मधु व्यो-कारः पादमध्ये येन्दो बभ्रो रेतरे वसो वसूनि दान्ते यह्वो धिगो स्तावे मिन्दवौकार उरा विसौ मधौ मतौ तस्थौ योनौ चाभे ॥ ६

रथन्तरे स्तावाद्य माघायां वृत्सर्वत्र सत्तरे तुरीयं नीच० सर्वत्र च मन्नजातोदब्धः सुदेवो वः षिधे च तृ-तीयचतुर्थे द्वे दुरितावसतश्चाजावितोत्तरयोरेन्द्रयाहि-

पूर्वयोः पर्युषु चोपान्त्योच्चां पतिगिरासिते च देवाव्ययोस्तृतीयोच्चान्त्य मग्नि मी सेधे चाभिसोमा-व्ययोः पिबासु चाद्यायां चनदे च स्वास्वाद्ययोर्डिने चतु-र्थोच्चानि यथा योनावाद्यं द्वितीयायां प्रथमे निघाता-न्मन्द्रे तृतीयायां चप्र तृतीययोः कौल्मलबर्हिषासिक्षणुषा-माशुभार्गवे ल्युत्तरोह्वा पञ्चाद्यरोच्चाद्ययोर्योनिवदस्य ध्यमाया मातृनाकूपारे चाद्यायां द्युत्तरोत्तरयोरच्छिद्रै-कर्चेणोर्नीचः सेतःशब्दश्चावृद्धो विचे प्रत्यये वृद्धः सिते वृण्यन्तः चीवते द्वितीयपादान्त्य मद्वितीयस्वरं विशीये मोच्चादिर्नीचो नावहिल्वन्ति सर्वासु चीयच्चाद्यायां चीय-दन्यदुच्चं सकृष्टं च तृतीयं नौ द्वितीय मुत्तरयोरेका-न्तरणिधने च जये शता द्वितीयम् ।। ७

गूर्द उत्तरयोर्होता यन्ना मृतुष्ठा चीयवत्तौरे प्रस्तावो योनौ प्रत्नं सधस्थायां यजिसङ्घातवत्पूर्वार्क-पुष्परयिष्ठयोः स्तौभिकं पर्वानुपादं सामान्ते सर्वा-ग्यार्चिक मकृष्टं सर्वत्रायोनौ वैधृते ह नौथे रे च द्वितीयं वाम्रे चायोनौ च्छिद्रे भिसोमाद्यायां नीचं ध्यभ्यासे चीयच्चं विशीयान्त्यायाम् स्यामान्माभयोरे-कत्वान्माभा संपूर्यते दिस्वरे विराम मेके रावबृहति च शतान्माभयोरच्चोरूपध्यमाया मुस्थ माउवायां वि-

रामखिडनतृतीयायाꣳ स्तावे भ्यासाभाव मेके रंघोषे
वा विसर्जनीय आम्नायसिद्धत्वाद्बृहती-क्रौञ्चे तृतीये
पादे तृतीयोच्च मभीवर्त्तवद्द्राणतृतीयायां च रक्षाश-
तासूष्वे पतिः कवीषु चान्तरस्याक्षरस्याभ्यासः सर्वा-
स्तृतीये दे क्रुष्टद्वयोर्मध्येगीतं लुप्यते कौर्त्स्य-
शःसꣳसर्पेषु वान्तेरयतिशब्दौ नीचावरौ च यत्सर्व-
त्रासूर्यꣳ शौरते हुम्मान्नीयवज्जारादिश्च गौशृङ्गे सञ्ज-
याभीशववैयश्वसाध्रादिषु लक्षणसिद्धत्वात् द्रव्यान्तर
एकं पर्व भवति नमसा लेयवच्छायन्तीये मराये
हाउवान्तः क्रुष्टो वैराजे चायोनौ विनतप्रतिषेधो
वैरूपे तु देवतापदं देवतापदं निधने ॥ ८

अग्नस्त्रिणिधन उष्णायां द्वितीयपादद्वितीयं
वृत्प्रमातगेवत्यास्वानीकयायामाद्यं नुष्पि च शोके
प्रस्वरे थाउत्तरे दꣳष्ट्रे सोशब्दो दासे दुक्थे भिगीत-
क्रमयोरन्त्यर्यमेधे हायिस्तोभात् तृतीय मयोनौ कावे
गौथषष्ठꣳ सर्वत्रान्त्यपञ्चमं प्रोश्चयास्याꣳ सप्तमं
त्वाद्गुतादपञ्चयोश्च वैराजे प्रसशब्दाववृद् वैराजे प्रस-
शब्दाववृत् ॥ ९ ॥

॥ इति नवमः प्रपाठकः ॥

नकारश्च भवति सम्यगीतः कुवित्सु नायाम्बो-
घीय इहवद्दैवोदासे चोत्तमाया मप्रथमः स्वासु साहीये
चोत्तमाया मभिसामाध्यास्यायाए सर्वत्र योनौ हीडं
धत्ता द्व्यक्षरं पर्व दीचोद्गातपरत्वादेकाक्षर मून म-
धिकपर्वत्वाञ्च प्रथमस्वरे प्रत्यये क्रुष्यते भिप्रि त्र्यक्ष-
राणि सर्वासु न द्वितीयचतुर्थे पादे मराये भ्यास
एकाक्षरस्त्रिरुक्तः पादान्ते सर्वत्रापुरोनः पा-
दमध्ये च हिशब्दस्याभ्यासः प्रेङ्खाया मग्नेदी-
दिहि ॥ १

गूर्द्धे वृद्धं भवत्यकारोग्निप्रत्यये वादौ हिशब्दः
सौभरामहीयवकौल्मानां दासे च कावपर्णकूलीयाना
मो भवति साहीये च भिशब्दो नुत् कावे नाध्वतवत्य-
पर्स्वबोधीये च वाचि सर्व मोभवत्यनुस्यमो वा परा-
यान्त्वो भवत्यना तृतीयं क्रुष्ट मप्रत्युत्क्रान्त मा चतुर्थ-
कृष्टन्तु पादान्ते मन्द्रक्रुष्टस्वामन्द्रक्रुष्टस्य वृधन्यञ्जनानाए
स नित्य इत्येभ्यः परोभ्यासस्य देव्य श्रौर्णायवयो रो
भवति यकारे सानौ शब्दस्य सर्वत्राकारे वोधीय-
निधने च घोषे ॥ २

वीक्रौञ्चप्रमशाक्तत्रसञ्जयभरक्रन्दाभिकार्स्यश्रवस्यै-
ताकूपविशोविभीशककुभस्वारपर्सरस्याग्रादिष्वायास्य --

द्विनिकारवकारौ त्र्यवश्यावाश्वयश्चेषु च श्येयामध्यसमन्विता न निधनं हीषोऽषु या सामसु ॥ ३

श्यैते तृतीयादिन्या ओहोवायाः परं तृतीयं नीचं न तद्विप्रान्तयोर्बृहति च द्रासा द्वितीये कं सर्वत्रादर्शश्यमप्रथमतृतीयद्वयं यौसूचाकूस्तावतृतीयं नीच माद्याया साद्यं श्यमायान्तमसे चान्याद्वितीये नेकं सर्वत्र यानौ प्रथमे द्वे स्तोभे चोत्तरे वकार ओ भवत्यन्ते हिष्ठीयगवसितेषु स च प्रवृत्सर्वत्रान्त्य मयोनौ वसु च द्वितीयादसुतिथे च तृतीये प्रथमं योनौ जये च स्तावान्तर मयोनौ ॥ ४

क्रौञ्चे द्वे च मात्प्रथमोच्चमसूरासीये च तृतीयाद् गेष्णात् तृतीयं न मसोश्रवसश्चाद्वन्द्वान्ताज्जनिलोप उतद्विषायाश्चाद्यं श्रवायाश्च सेधे तु मत्स्पीयूषाद्यायां सतायस्य लोपः कृतिनि तृतीये द्वे सर्वत्र रम्यतेनुष्टुप् द्वितीये च षभे च प्राक् च तुर्श्ष्वयोनावो मिति च नीचः श्वे तृतीये पतृषट्वर एकचैं द्वे दसे च्चीये हाराद् योनिवद्विशोत्तमायां सोमाद्ययोश्चाग्नेये जास्वरं वृन्नविच्छन्दःसु प्रहूयसायाश्च द्यत्तर मद्वद्वादिस्तनिपार्श्वयोर्यथर्च्ः सर्वत्रास्तावहारयोरवश्ये हिस्तोमसु मरामरजीचभेचाकारान्तक्रान्तम-

योनावुदूहः सर्वत्रामीढे गतेश्च कनीयस्य त्वमोका-
रस्य कृतलेये त्वं पदगीतस्त्वसिद्धत्वात् ॥ ५

श्रुध्ये स्तावे तृतीये ष्यते सर्वत्र संवत्सायां तु तृ-
तीये गोमन्नश्च मरुता मिन्द्राꣳ स्वासूत्तमायां धसे
चतुर्थाद्यं योनिवद्द्ध्यमायाꣳ स्तावे द्वितीयङ्गातꣳ
कृणसाम्नत्राद्यान्त्ययोस्तु विकारो नासैधे धाह्याद्ययोः
पाह्युपा मापद्यतेऽथमोचꣳ षभङ्गविमजने च भुलंविः
स्मिन्त्सि च वरुपृश्निश्चैतमद्गेषु ष्टम्भे चैाशसूपे श्रौये
च नाकृदृꣳहव्यशसि कृष्टादेकं ध्यमायां मकारो
द्वितीयꣳ सम्मिस्नः सुरूपे पदगीत श्रोष्ठ्य हकारे
च ककारस्त्वौ भवति मराये द्विमात्रः ष्ठेष्वःकारस्त-
रायेषु प्यते नौ च कृणसाम्नि द्वितीये लान्देथ-
मोश्च मकुति चतुर्थे तु हणीजास्वरꣳ सर्वत्र काम्या-
चयतेनयताविम्निरे च दे दे चाविधाः सर्वचायोनौ
जास्वरꣳ श्रवमनसे च द्विषः श्रवमनसे च द्विषः ॥ ६

प्सु षडन्ते रद्धाष्कारणिधनवदुपान्त्ये भिराय-
वान्यत्र सुतादालुम्रापञ्चाद्धरश्चाभ्यासः क्रयाꣳराजे
ध्यमायां पाष्ठहृदाद्यायां चान्त्यस्य तमसे स्वासूत्तरयो-
र्वृणीत रुते चतुरक्षरे नाभ्यासे मराये हाउवा द्विती-
यात्संकृष्टादान्त्याविधाः सर्वत्र स्वासूत्तमायां प्रथमे

दे मूर्द्धन्या एव दन्त्याः स्वरोपधोष्मयोर्हितिहारी स्यादविकृतपूर्वपदवत्परिष्कृते चागमो लोप्यः ॥ ७

कार्ष्णश्रवसोत्तरयोर्व्यैः स्वदयासदाव्रधादस्मिन्सुराक्रौञ्चेस्वभानहिवामग्निर्वोवाजीय उपान्त्यं क्रुष्टं सर्वासु त्रिकवत्सायां चाद्ययोः प्रथमायां चतुर्थ मुत्तरयोः पञ्चमञ्च स्वासु वैराजे तृतीये प्रथमान्त्या वृद्धे आप्ररसं नाम्नि द्वितीयायाञ्च राधायां तृतीय मयोनौ कौत्सदष्ट्रोत्तराकूपारश्रुध्यपृश्निमानवाद्यरूणवैधृतवासिष्ठतिथकुभनित्येषु चनोतिषड्गशाक्वरयोराम्यान्तो योनौ ग्निस्वी वारे रिपिन्नुरपि शोके मानगोभिस्त्रिणिधने सौहविषरन्ध्रोत्तरयोर्गोभिर्लान्दे स्वान्याद्य मुपान्त्य मयोनौ ॥ ८

यस्ते हरे च श्येने दानाध्वरं प्रोवाराहश्रोताकयस्थिरं द्वितीय कर्षणं धर्त्तासाविसोचसस्तु सफे मादा स्याद्यरान्देव्ये प्रहू द्वितीयं मन्यतां वैराजे योनावन्त्ययोर्न्नतं वैश्वमनसे त्वात् स्तोभार्चिकसन्धिर्ग्रहणात्सप्रे द्वितीयान्ते प्रोत्तमाया माद्ये शोके चाद्ययोः शोक्ते च सुषश्रीणप्रत्नञ्च रूणसाम्नीलान्दे हीषीप्रभृत्युद्धारोन्त्याया मनुद्धारस्तमसोर्क्के योनावाद्ययोर्मागायतोद्घातनिघातौ ॥ ९

अथोहगीतीनां प्रस्तावोद्देशः स्तोभः पुरस्तादन्तर्वा प्रस्तोतुरन्ते चाविधाय उद्गातुस्तु काण्वर्षभपावमानजनित्राणाꣳ हुवाद्विर्वासिष्ठे पद्यो नादशे द्व्यक्षरो वा संक्रतिदार्ढच्युतयोश्चतुरक्षरो वा सुरूपाजिगैडसाकमश्वानाꣳ सदेवतोवा राजनशाक्वरर्षभयोर्हिंपाञ्जयनानदगौशृङ्गराक्षिदैवोदासानां .काण्वश्रैतकक्षार्षभश्यन्नायास्यैडोच्चौरन्वैडसौपर्णमोक्षमागीयवजराबोधीययद्वाहिष्ठीयोत्सधवाम्नश्वारसामराजपौरुमीढपूर्ववारवन्तीयवार्त्रतुरयशववैरूपहृस्वाबृहदापशामहादिवाकीर्त्तानां वान्तःक्रुष्टाद् वृष्णोद्विर्वारवन्तीय आत्मनि च महादिवाकीर्त्ये यान्तो दाशस्पत्यभासशाम्मदगायत्रासितानां जारान्तो वीङ्कवसिष्ठप्रियपज्राणां वारान्तो वैश्वामित्रे हाउकारान्तः सन्तनिजमदग्न्यभवीर्त्त कार्त्तयशाकारान्तत्वाष्ट्रीसाम्नां जाराग्निन्दूतोपक्रमाणान्तं एवाविभाग्यानाम् ॥१०

यौक्ताश्वैडयास्यवैशोकक्रोशश्रैष्टोद्दशपुलदैर्घतमससिमानांनिषेधवैराजानां द्व्यक्षरोभ्यस्तो द्व्यक्षर आनूपैटतसौहविषवैष्णवोत्तरपयोन्तःस्वराणा मग्निन्दूताभ्यस्तामध्यमक्रौञ्चस्य पादोभ्यस्तो वषडन्ताभ्यस्ताकूपारराजनपयसां द्वादशाक्षराणि च रैवतर्षभे त्र्यक्षरो

बृहत्के सोमसामगायत्रीक्रौञ्चवैरूपौदलगायत्रगौशनं-
सैन्धुक्षितमैधातिथरोहितकूलीयैहवदैश्ववाहेन्द्रस्यय -
श:कण्वबृहत्त्रैष्टुभश्यावाश्वगौतमवार्षाहरवाजभूरका-
र्णश्रवसानां चत्वारि द्वे वान्त्ययो: षट् शङ्कुवार्हतवा-
जजित्स्वाररोहितकूलीयासितयौक्तस्रुचाना मष्टावौ-
रुक्षयजागतसामसाम्नोरेकादशोत्तरे जनित्रे द्वादश
हरिश्रीयन्ते स्तोभ उपायान्त:पदनिधनेषु निधनश्च
तदङ्गं स्याद् द्विरेकवृषे त्रिर्वा पदस्तोभेष्विलान्दाद्ये
त्रिरुक्तं यथोक्त मितरेष्वन्त्ये वा द्व्यक्षरे महानाम्नीषु
द्विपदासु प्रस्ताव: शाक्वरप्रथमेष्वध्यासपुरीषेषु च
यथोपदिष्टं वैच्छन्दसेषु गीतं प्रास्ताविक मेव स्याच्य-
वनादीना मप्रस्ताव्या उत्तरा: प्रस्ताव्ये वा सन्तनिन:
प्रस्ताव्ये वा सन्तनिन: ॥ ११ ॥

॥ इति दशम: प्रपाठक: ॥

॥ इति सामप्रातिशाख्यं समाप्तम् ॥